॥ दारिद्र्यहर स्तोत्रम ॥

हा कृष्ण बदरीवासिन क्वासि व्यास दयानिधे ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ १ ॥
हा सच्चिच्छुभद क्वासि तर्काभयविराजित ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ २ ॥
हा कीटराज्यसंदायिन क्वासि वासिष्ठवंशज ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ३ ॥
हा पाराशर्य सर्वेश क्वासि सत्यवतीसुत ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ४ ॥
हा तापसशिरोरत्न क्वासि देवेश तुष्टिमन ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ५ ॥
हा विद्यामणिजन्माब्धे क्वासि द्वैपायनानघ ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ६ ॥
हा शुद्धबुद्धिद क्वासि बादरायण सर्वदा ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ७ ॥
हा दुर्बुद्दितमःसूर्य क्वासि वेदविभाजक ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ८ ॥
संसारकाननेऽज्ञानद्वारकीलसुदुःखितम ।
दारिद्र्यदुःसहावस्थमनाथं पाहि मां प्रभो ॥ ९ ॥
विषयासक्तचेतोवाक्शरीरं दोषदूषितम ।
दारिद्र्यदुःसहावस्थमनाथं पाहि मां प्रभो ॥ १० ॥
श्रौतस्मार्तक्रियाभ्रष्टं बाह्यशौचविवर्जितम ।
दारिद्र्यदुःसहावस्थमनाथं पाहि मां प्रभो ॥ ११ ॥
दुर्दानादानकर्तारं दुरन्ने निरतं सदा ।
दारिद्र्यदुःसहावस्थमनाथं पाहि मां प्रभो ॥ १२ ॥
परदाररतं नित्यं परनिंदायुतं सदा ।
दारिद्र्यदुःसहावस्थमनाथं पाहि मां प्रभो ॥ १३ ॥
आम्नायज्ञेयकायात्मन भक्तभक्तिप्रकाशित ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ १४ ॥
जननीवचनत्राणपरायण गुणायन ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ १५ ॥

अचक्षु:पूर्वजाभेद्यसंजयज्ञानद प्रभो ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ १६ ॥
व्याख्याशक्तिप्रद श्रीद कविताप्रद मानद ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ १७ ॥
ज्ञानदीपप्रभाभात ब्रह्मांडांतर्बहि:स्थित ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ १८ ॥
अशेषदोषदावाग्ने भवामयभिषङ्मणे ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ १९ ॥
राकाधिपकराश्लेषहर्ष निर्दोषपूरुष ।
अमंदानंद मां व्यास कृपादृष्ट्या विलोकय ॥ २० ॥
इमं मंत्रं पठेद्यस्तु शतवारं गुरोः शुचिः ।
ददाति तस्य संपत्तिं शुकतातो न संशयः ॥ २१ ॥
॥ इति श्रीयदुपत्याचार्यकृतं दारिद्र्यहर (व्यास) स्तोत्रम ॥